अजन्ये स्याच्चोत्पतन उत्क्रामः पुनरुच्यते ।
ग्रन्थावच्छेदभेदे स्यात् क्वचिदुत्क्रमणेऽपि च ॥ ४७ ॥

उत्त्रासस्तु भये समन्दद्यारवेऽर्गलिके ।
यूपस्य मूलादारभ्य द्वितीयेऽथ विवाहके ॥ ४८ ॥

उद्वाह ऊर्ध्ववहने पुंस्यप्युद्धारवाक् पुनः ।
ऋणे चावृद्धिके किञ्च भवेदुद्धरणेऽपि च ॥ ४९ ॥

उद्दालस्तु भवेद् वृक्षे श्लेष्मातक इति श्रुते ।
उन्नते मुकुलाकारे मत्स्यग्रहणसाधने ॥ ५० ॥

दाशानां स्यादथोद्गीथः सामि स्यात् पञ्चधा कृते ।
द्वितीयभक्तौ विद्वांस्तु स्याच्चैष शाकटायनः ॥ ५१ ॥

सामगाने शुनामूर्ध्वमुखानां च विरावके ।
उदर्को भाविकालस्थफलेऽन्त्यावयवेऽपि च ॥ ५२ ॥

रभसस्त्वाह मदनकण्टके शब्दविक्रमः ।
उदयस्तूदयाद्रौ स्याद् धनोत्पत्तौ तथोदये ॥ ५३ ॥

उन्नतौ चाह रभस उपरिस्थेऽप्यधीश्वरे ।
उच्चयो वस्त्रनीव्यां स्याद्धस्तादावपि चौर्यतः ॥ ५४ ॥

अधः स्थितस्य पुष्पादेरूर्ध्वमुच्चयने यथा ।
उपायः पर्वभेदे स्यात् पुरस्मिन् सामपर्वणाम् ॥ ५५ ॥

निधनात् कर्मणां सिद्धेर्लघुमार्गणसाधने ।
राज्ञां च सामदानादौ विशेषाच्चोपसर्पणे ॥ ५६ ॥

उपवस्तु रवौ दाहेऽप्युपाधिः पुनरुच्यते ।
उपधानक्रियायां च रथस्यावयवान्तरे ॥ ५७ ॥

औपधेयसमाख्ये च व्याजे चोपाधिवाक् पुनः ।
कुटुम्बव्यापृते धर्मचिन्तायां च वदत्यदः ॥ ५८ ॥

DR.RUPNATHJI( DR.RUPAK NATH )

कार्यान्वयव्यंवच्छेत्तृ तत्राथोदयनोऽपठीत् ।
साधनाव्यापकत्वे स्यात् समव्याप्तिकता तु या ॥ ५९ ॥

साध्येनायमुपाधिः स्यादित्येवमथ ऋक्षरः ।
कण्टके च जलस्थानेऽप्यृत्विज्यपि तथापरे ॥ ६० ॥

पठन्ति तोयधारायामित्येधितुपदं* पुनः ।
अग्नौ समुद्रे शैले च ककुभस्त्वर्जुनद्रुमे ॥ ६१ ॥

वीणाप्रसेवके गेयभेदे च कलमः पुनः ।
लेखन्यामङ्कुरे शालिप्रभेदे तस्करेऽपि च ॥ ६२ ॥

कल्लोलस्तु महत्यूर्मौ शत्रौ च रभसोदितः ।
कपर्दस्तु जटाजूटे देवदेवस्य शूलिनः ॥ ६३ ॥

दृश्यते च जटाजूटमात्रे स्याच्च वराटके ।
कर्दमस्त्वत्र पङ्कारे पङ्के च रभसोदितः ॥ ६४ ॥

कलङ्कस्त्वपवादे च चिह्ने च कलहः पुनः ।
युद्धे द्वन्द्वे च करभः पुनः कीर्तित आतपे ॥ ६५ ॥

तथोक्तो धान्यपवने कटहः पुनरुच्यते ।
पर्जन्ये कर्णवर्ति च कालायसविनिर्मिते ॥ ६६ ॥

जलपात्रेऽथ कणयः शरभेदे च भाषितः ।
क्रतुभेदे च कचपः पुनः शाकपलालयोः ॥ ६७ ॥

पत्रे तिले करूशास्तु नीवृद्भेदे हि भूमनि ।
स्यात्तु क्षत्रियभेदेऽसौ सर्वैश्च वचनैर्युतः ॥ ६८ ॥

वैद्यस्तु तण्डुलकणे कश्चिद् ब्रूते तु सज्जनः ।
कुसूले रभसस्त्वाह कदरः खदिरे सिते ॥ ६९ ॥

---

१. 'स्य विच्छेद त' (?) ङ. पाठः.

---

* 'एधतुः पुरुषेऽग्नौ ना' इति तु मेदिनी ।

DR.RUPNATHJI( DR.RUPAK NATH )

तदा स्त्रियां कुसीदायी§ **कुटीरस्तु** पुमानयम् ।
क्षुद्रागारे कर्कटे तु द्वे **कुम्भीरस्त्वयं** द्वयोः ॥ ९४३ ॥
नक्रे चोरे पुन(स्त्री॰स्त्रि)स्यात् **कुम्भीलस्तु** [1]पुमानयम् ।
स्यालाख्यमत्स्ये त्रिषु तु श्लोकच्छायादिहारिणि ॥ ९४४ ॥
चोरे च **कुन्[2]दुमस्तु** स्यात् पुमान् पुञ्जे[3] द्वयोः पुनः ।
मार्जारे **कुट्टिनी** तु स्त्री शम्भल्यां कुट्टना पुनः ॥ ९४५ ॥
छेदने कुत्सने चापि न ना स्यात् **कुनटी** पुनः ।
स्त्रियां मनःशिलायां स्यात् कुत्सिते तु नरे द्वयोः ॥ ९४६ ॥
**कुशिकस्तु** क्रोष्टरि द्वे स्यादुलूकेऽप्यथ नपि ।
**क्षुद्रकं** फाणिताभिख्ये विकारे स्याद् गुडस्य हि ॥ ९४७ ॥
तथैव कुप्यलवणसंज्ञे स्याल्लवणान्तरे ।
द्वे तु क्षत्रियभेदे स्यात् क्षुद्रकस्तु पुमानयम् ॥ ९४८ ॥
अर्धचन्द्राख्यशस्त्रे स्यात् कश्चित् त्वश्वान्तरेऽभ्यधात् ।
**कुञ्चिका** त्वङ्कुटा[4]भिख्ये कपाटोद्घाटयन्त्रके ॥ ९४९ ॥
तूलीसूचिकयोश्चाह रभसो भीरुभीषणे ।
साधने कुत्सितारि तु त्रिरथो **कुञ्जरा** स्त्रियाम् ॥ ९५० ॥
पाटलायां च धातक्यां द्वे तु हस्तिन्यथ स्त्रियाम् ।
काञ्चनी गुडूच्यां च **कुण्डली** क्ली तु पाशके ॥ ९५१ ॥
कुण्डली तु कर्णवेष्टे स्यात् त्रिलिङ्ग्यां च परोऽवदत् ।
**कुद्दालस्तु** पुमान् गोदारणाख्ये खानसाधने ॥ ९५२ ॥

DR.PURNAHUTI (DR.RUPAK NATH)

---

१. 'द्वयोरय' क. ङ. च. पाठः. २. 'लु' ग. पाठः. ३. 'च्छे' ग. पाठः. ४. 'ख्य' ग. पाठः. ५. 'वा' ङ. पाठः.

---

§ 'वृषाकप्यग्निकुसितकुसिदानामुदात्तः' (४. १. ३७) इति सूत्रे 'कुसिदशब्दो ह्रस्वमध्यो, न तु दीर्घमध्यः' इति सिद्धान्तकौमुदी ।

**गर्मुद**स्तु द्वयोर्मर्त्यजातिभेदे निषादतः ।
श्वपाक्यां जनिते स्त्री तु गर्मुदी गर्मुदाह्वये ॥ १४२ ॥

तृणधान्यविशेषे च **गण्डूषा** मुखपूरणे ।
द्रवप्रपञ्च आस्येन निरोध्ये शाकटायनः ॥ १४३ ॥

गजस्य पुष्करेऽन्ये तु प्रसृतोन्मितवस्तुनि ।
अन्ये तु प्रसृते लिङ्गत्रयेऽसौ कीर्तितो बुधैः ॥ १४४ ॥

प्रसृते तु द्रवाधारे गण्डूष इति यादवः ।
**गण्डोल**स्तु पुमान् पिण्डे गजस्य मुखपार्श्वयोः ॥ १४५ ॥

उपरिप्रदेशयोश्च क्रिमिभेदे तु स द्वयोः ।
**गण्डीर**स्तु पुमान् कन्दजातिभेदे समष्ठिला ॥ १४६ ॥

इति संज्ञान्तरं यस्य बहुभेषजसाधिते ।
उपयोग्यद्रवद्रव्ये क्ली तु स्यात् तण्डुलीयके ॥ १४७ ॥

चव्ये च स्त्री तु गण्डीरी विपत्रायां स्नुहि स्मृता ।
**गण्डक**स्तु द्वयोः खड्गमृगे ना शिशुभूषणे ॥ १४८ ॥

नदीविशेषे विख्याते स्त्रीलिङ्गा गण्डकी स्मृता ।
**गर्दभः** पशुभेदे द्वे रासभाख्ये नपि त्वदः ॥ १४९ ॥

कुमुदे रभसस्त्वाह श्वेते कुमुद इत्यदः ।
रूप्ये च **गरलं** तु क्ली विषे पुंसि तु पादपे ॥ १५० ॥

मदनाख्येऽथ **गवलं** विषाणे महिषस्य नप् ।
द्वयोस्त्वरण्यमहिषे **गर्जित**स्तु पुमानयम् ॥ १५१ ॥

मत्तहस्तिनि तन्नादे पुनः क्ली स्तनितेऽपि च ।
अम्बुदस्याथ पुंसि स्याद् **गर्जनो** गृञ्जनाह्वये ॥ १५२ ॥

पलाण्डुजातिभेदेऽथ क्रियायां गर्जतेर्नपि ।
**ग्रन्थिकं** तु नपि ज्ञेयं पिप्पलीमूलसंज्ञके ॥ १५३ ॥

DR.RUPNATHJI( DR.RUPAK NATH )

मनोजवे तु त्रि स्याच्च तप्तेऽथो **तातगुः** पुमान् ।
क्षुद्रताते त्रि तु हिते तातायाथास्त्रियां भवेत् ॥ ८९४ ॥

**तिलकः** पुण्ड्रके [1]क्षुद्रतिले त्वेष पुमांस्तथा ।
श्रीमत्संज्ञे वृक्षभेदे तथा कुरवकाह्वये ॥ ८९५ ॥

तिलकालकसंज्ञे च पिप्लुभेदे नपि त्वदः ।
जठरावयवे क्लोमसंज्ञे द्वे तु हयान्तरे ॥ ८९६ ॥

एतद् रभसकोशोक्तमथ स्यात् **तिमिरो**ऽस्त्रियाम् ।
अन्धकारेऽक्षिरुग्भेदे तिमिरा तु स्त्रियामियम् ॥ ८९७ ॥

वाद्यभेदे **तिरीटस्तु** रक्तलोध्रे पुमानयम् ।
[2]मकुटे तु नपि स्त्री तु [3]बदर्यां स्यात् तिरीटिका ॥ ८९८ ॥

**त्रिकूटस्तु** सुवेलाख्यगिरिभेदे [4]त्रिलिङ्गकः ।
सामुद्रलवणे तु क्ली समासोऽत्र पूर्ववत् ॥ ८९९ ॥

**तिलित्सस्तु** द्वयोः सर्पभेदे गोनससंज्ञके ।
तरक्षुसंज्ञके व्याघ्रभेदे **त्रिदिववाक्** पुनः ॥ ८६० ॥

ना स्वर्गाकाशयोः क्लीबे त्वन्ये केचित् स्त्रियां पुनः ।
एलायां निम्नगाभेदे त्रिदिवा **त्रिपदी** पुनः ॥ ८६१ ॥

हस्त्यङ्घ्रिबन्धरज्जौ स्त्री पदत्रयसमाहृतौ ।
त्रि तु यस्य पदानि स्युस्त्रीणि तत्र स्त्रियां पुनः ॥ ८६२ ॥

श्वेतासंज्ञलतायां स्यात् **त्रिपुटा** त्रिपुटीति च ।
एलायां त्रिपुटैव स्यात् सूक्ष्मायां रभसः पुनः ॥ ८६३ ॥

---

१. 'कृष्णति' क. ङ. च. पाठः. २. 'कर्कटे' ग. पाठः. ३. 'विदार्यां' ग. पाठः. ४. 'पुत्रव' ग. पाठः. ५. 'ना' ग. च. पाठः.

DR.RUPNATHJI( DR.RUPAK NATH )

अल्पेऽथ भ्रातरि पुमान् रभसेन समीरितः ।
अथ §त्रैराज्यजे द्वे स्यान्मर्त्यजात्यन्तरेऽपि च ॥ ९०८ ॥
वैश्यपूर्वक्षत्रियायां व्रात्याज्जाते प्रयुज्यते ।
**द्रमिलो दर्शनं** तु क्ली नेत्रे शास्त्रे मते धियाम् ॥ ९०९ ॥
ज्ञाने च स्वप्नवीक्षासु[1] क्रियायां पश्यतेरपि ।
धर्मदर्पणयोस्त्वाह रभसः शब्दवित्तमः ॥ ९१० ॥
दर्शनी तूपरथ्यायां[2] स्त्री पुरादेर्गदस्य[3] च ।
यन्त्रभेदे दर्शनार्थे दर्शना तु न ना तथा ॥ ९११ ॥
दर्शनं दर्शयत्यर्थे **दर्शकस्तु** पुमानयम् ।
द्वाःस्थेऽथ भेद्यवद् द्रष्टृदर्शयित्रोरथो पुमान् ॥ ९१२ ॥
दन्ते स्याद् **दशनो** दष्टिक्रियायां तु नपुंसकम् ।
**दशमं** तु दशानां स्यात् पूरणे त्रि स्त्रियां पुनः ॥ ९१३ ॥
दशमी यमतिथ्यां स्याद् **दर्वरस्तु** पुमानयम् ।
वज्रे[4] स्त्रियां तु सेनायां दर्वरी स्याद् द्वर्पः पुनः ॥ ९१४ ॥
**दशेरः** सारमेये च सर्पे चाथो नृभृञानि ।
मरुसंज्ञे जनपदे दशेरा **दर्पकस्तु** ना ॥ ९१५ ॥
कन्दर्पे त्रिः पुनर्दृप्तदर्पयितर्यथो पुमान् ।
आदर्शे **दर्पणः** क्ली तु दृप्तौ दर्पयतेः पुनः ॥ ९१६ ॥
क्रियायां दर्पणा तेन(?) **दमयन्ती** पुनः स्त्रियाम् ।
स्याद् ब्रह्मचारिषण्डे च भार्यायां च नलस्य हि ॥ ९१७ ॥
त्रिस्तु स्याद् दमयितरि दमयेत् तनये पुनः ।
**दायादो** द्वे सपिण्डेऽपि यस्त्वन्यो दायभाग् भवेत् ॥ ९१८ ॥

---

१. 'षा' ग. पाठः. २. 'राथ्यायां' क. च. पाठः. ३. 'गुरस्य' ग. पाठः. ४. 'क्रे' क. च. पाठः. ५. '(यन्त?यंस्त) न' क. ङ. च. पाठः.

---

§ चेरचोलपाण्ड्यजाते ।

DR.RUPNATHJI( DR.RUPAK NATH )

त्रिस्तु तद्वत्यथो पुंसि **धूमलः** कृष्णलोहिते ।
मिश्रवर्णे तद्वति तु त्रिरथो पुन्नपुंसकम् ॥ ९८८ ॥

देवतार्चनतूर्येऽथ **धोरणं** वाहने नपि ।
वाजिनां गतिभेदे च धौरिताख्ये त्रि तद्वति ॥ ९८९ ॥

हंसे तु द्वेऽथ **नलिनं** नलिकायां[1] नपुंसकम् ।
पद्मे तु पुंस्यप्येकेषामन्येषां तु स्त्रियामपि ॥ ९९० ॥

नलिनी तु स्त्रियामेव पद्मस्तम्बे सरस्यपि ।
रभसस्त्वपठीद्[2] व्योमनिम्नगायां च ना पुनः ॥ ९९१ ॥

**न्यग्रोधो** व्योमसंज्ञे स्यात् प्रमाणे वटपादपे ।
फले त्वस्य लुकोऽभावान्नैयग्रोधमिति स्मृतम् ॥ ९९२ ॥

न्यग्रोधी तु स्त्रियां स्तम्बे द्रवन्तीसंज्ञकेऽथ ना ।
**नन्दको** वासुदेवस्य खड्गे नन्दितरि त्रिषु ॥ ९९३ ॥

**नन्दनस्तु** द्वयोः पुत्रे क्ली तूद्याने शचीपतेः ।
नन्दथौ च[3] पुमांस्तु स्यादर्थे नन्दयतेस्त्रि तु ॥ ९९४ ॥

स्यान्नन्दयितरि स्त्री तु **नन्दन्ती** स्यात् सखीजने ।
**नन्दन्तस्तु** पुमान् सख्यौ भेद्यलिङ्गं तु नन्दताम् ॥ ९९५ ॥

इत्याशीर्यत्र तत्र स्यान्**नमस्या** तु स्त्रियामियम् ।
पूजायां पूजनीये तु त्रिर्**नभाका** त्वियं स्त्रियाम् ॥ ९९६ ॥

चक्रवाकाख्यविहगजातौ काके पुनर्द्वयोः ।
अथात्र रभसेनोक्तमसभ्यं तन्न रोचते ॥ ९९७ ॥

नटे पटगले पुंसि चारणे केवलेऽपि च ।
**नर्तकः** स्यात् करेण्वां च लासिकायां च नर्तकी ॥ ९९८ ॥

**न्यस्तकस्त्व**स्त्रियामर्थनिक्षेपे धनिभिः कृते ।
त्रिस्तु स्यान्निहिते स्त्री तु रेवाख्यसरिदन्तरे ॥ ९९९ ॥

---

१. 'ना' ग. पाठः. २. 'पठत्' क. पाठः. ३. 'चा' क. ङ. च. पाठः.

DR.PURNATHJ(DR.RUPAK NATH)

कुलिशे भेद्यवत् तु स्याद् भेत्तर्यपि भिदेलिमे ।
**भीषणं** तु त्रिषु ज्ञेयं भीमे स्त्रीशण्डयोः पुनः ॥ १२९९ ॥

भीषणा भापनायां स्यात् स्त्री तु स्यात् सल्लकीरसे ।
कर्वाटे चेति रभसो भुवने तु नपुंसकम् ॥ १३०० ॥

पुंस्यप्येके विदुर्लोके क्लीबमेव जले विदुः ।
**भुजिष्यस्तु** द्वयोर्दासे धने तु (स ? क्ली) पुमान् पुनः ॥ १३०१ ॥

आचार्येऽप्योदने[2] चापि रभसो हस्तसूत्रके ।
त्रिस्तु[3] भोक्तरि विज्ञेयमनधीनसहाययोः ॥ १३०२ ॥

**भुजङ्गस्तु** विटे पुंसि तथैवान्यतमे भवेत् ।
चण्डवृष्टिप्रयातादिदण्डकानां द्वयोस्त्वहौ ॥ १३०३ ॥

**भुल्लिङ्गस्त्वृषिभेदे** ना नीवृद्भेदे तु भूम्नि च ।
स्यात् साल्वावयवे द्वे तु पक्षिजात्यन्तरेऽथ सा ॥ १३०४ ॥

***भुरण्यो** भास्करे विष्णौ वह्नौ क्षिप्रे पुनस्त्रिषु ।
**भूमिजस्तु** पुमान् दैत्यभेदे नरकसंज्ञके ॥ १३०५ ॥

अङ्गारके च स्त्री तु स्यात् सीतायां भूमिजाथ तत् ।
यत्किञ्चिद् भूमिसम्भूतं तत्र स्याद् भेद्यलिङ्गकम् ॥ १३०६ ॥

अस्त्री त्वाभरणे ज्ञेयं **भूषणं** भूषणा त्वना ।
अलङ्कृतावथ स्त्री स्याच्चतुर्दश्यां तिथौ तथा ॥ १३०७ ॥

**भूतेष्टा** वाञ्छिते[4] तु त्रिर्भूतानामथ सा स्त्रियाम् ।
तीक्ष्णार्जकाख्यस्तम्बे स्याद् **भूतघ्नी** त्रिषु हन्तरि ॥ १३०८ ॥

---

१. 'वो' क. ग. ङ. च. पाठः. २. 'ध्य' ग. पाठः ३. 'तु' क. पाठः. ४. 'लञ्छिते' क. च. पाठः.

---

* भुरण्यु विष्णुभास्करौ' (पृ. २४३. श्लो. ५९) इति तु वैजयन्ती ।

DR.RUPNATHJI( DR.RUPAK NATH )

भूतानाममनुष्येऽथ **भूमिस्पृग्** वैश्यमर्त्ययोः ।
द्वयोः स्प्रष्टरि तु त्रि स्याद् भूमेरथ नृलिङ्गकः ॥ १३०९ ॥

**भृङ्गारः** कनकाल्वां स्याद् भृङ्गारी तु स्त्रियामियम् ।
झिल्लिकासंज्ञके कीटे चक्रे तु **भृमलं** नपि ॥ १३१० ॥

ना तु वायौ द्वयोस्तु स्यात् कृमिजात्यन्तरेऽथ नप् ।
**भेषजं** स्यात् सुखे तोये ह्यौषधे तु हि भेषजी ॥ १३११ ॥

क्लीनपोर्भैरवं तु त्रि(हिं?भीं)मे स्याद् भैरवी पुनः ।
सप्तानामपि मातॄणामेकस्यां मातरि स्मृता ॥ १३१२ ॥

**भोजनं** तु धने भुक्तौ क्लीबं स्याद् भोजना पुनः ।
नप्स्त्रियोर्भोजयत्यर्थे **भोगवत्** तु त्रिषु स्मृतम् ॥ १३१३ ॥

भोगयुक्ते द्वयोस्तु स्याद् भुजगो भोगवानथ ।
नद्यां नगर्यां नागानामिय भोगवती स्त्रियाम् ॥ १३१४ ॥

वैजयन्ती तु पातालगङ्गायामित्यभाषत ।
**भौरिकः** कनकाध्यक्षे त्रिः पुम्भूम्नि तु भौरिकाः ॥ १३१५ ॥

प्राग्देशावस्थिते नीवृद्भेदे समतटाह्वये ।
अथ मङ्गलमल्ली स्यात् कल्याणे त्रि तु तद्वति ॥ १३१६ ॥

मल्लिकागन्धसदृशगन्धयुक्ते च वस्तुनि ।
मङ्गला सितदूर्वायां स्त्रियां रभस उक्तवान् ॥ १३१७ ॥

क्लीबं तु मल्लिकापुष्पगन्धे लब्धार्थरक्षणे ।
पुमांस्त्वङ्गारके ग्रामवास्तुभेदे च केचन ॥ १३१८ ॥

**मङ्गल्यं** तु निमित्ते स्यान्मङ्गलस्याभिधेयवत् ।
मल्लिकापुष्पगन्धेन युक्ते वस्तुनि चाथ नप् ॥ १३१९ ॥

ज्ञेयं सर्वौषधिस्नाने दध्नि चाथ नृलिङ्गकः ।
बिल्वे मसूरसंज्ञे च धान्ये स्याद् रभसः पुनः ॥ १३२० ॥

DR.RUPNATHJI( DR.RUPAK NATH )

अश्वत्थे त्रायमाणायामप्याचष्ट स्त्रियां पुनः ।
मङ्गल्या स्याद् वचायां च मल्लिकापुष्पगन्धिनि ॥ १३२१ ॥

कालागुरुविशेषे च गन्धभेदे च यः स्थितः ।
मल्लिकाकुसुमे तस्मिन् रभसस्तु बहूक्तवान् ॥ १३२२ ॥

रोचनाशम्यधःपुष्पीमसीशुक्लवचास्वपि ।
इत्येवमथ विज्ञेया शब्दज्ञैर्मण्डली त्रयी ॥ १३२३ ॥

बिम्बे चाप्युपसूर्ये च कुष्ठरोगान्तरेऽपि च ।
समूहमात्रे ग्रामौघे देशे द्वादशराजके ॥ १३२४ ॥

युग्मे च शुनि तु द्वे स्यान्मण्डपोऽस्त्री जनाश्रये ।
मण्डस्य तु पिबे त्रि स्यादथ स्यान्नपि मण्डनम् ॥ १३२६ ॥

विद्यादाभरणे भूषिक्रियायां तु न ना स्मृता ।
मण्डना रभसस्तु त्रिः शब्दज्ञोऽलङ्करिष्णुनि ॥ १३२६ ॥

मत्सरा तु स्त्रियामाह मक्षिकायां पुमान् पुनः ।
भवेत् परशुभद्वेषे लोभे कोवेऽजयोऽपठीत् ॥ १३२७ ॥

यागसाधनसोमाख्यद्रव्ये च कृपणे पुनः ।
मेद्यवत् परसम्पत्तेरसोढर्यजयः पुनः ॥ १३२८ ॥

निष्क्रयेऽप्याह मदनः पुनः पुंसि मनोभवे ।
पिण्डीतकतरौ स्याच्च धुर्धूरे वर्सिक्थे ॥ १३२९ ॥

वृक्षे कुरवकाभिख्ये मधूच्छिष्टवसन्तयोः ।
कस्तूरिकामृगस्याण्डे पुनः स्त्री मदनी तथा ॥ १३३० ॥

सुरायां च नपि त्वेतत् प्रसवेऽत्रोक्तशाखिनाम् ।
मदनं माद्यतेश्चार्थे मदना त्वपुमानसौ ॥ १३३१ ॥

धातोर्मदयतेरर्थे मन्मथस्तु पुमानयम् ।
रभसः कामचिन्तायामित्यध्यैष्ट महामतिः ॥ १३३२ ॥

---

१. 'रुक्मे च' ग. पाठः.

कन्दर्पे च कपित्थे च क्ली तु तत्प्रसवेऽथ नप् ।
मधुकं मधुयष्ट्याख्यभेषजेऽथाजयोऽवदत् ॥ १३३३ ॥

स्त्रियमेनाममुत्रार्थे जातिभेदे तु स द्वयोः ।
मैत्रेयायोगवीजाते वन्दिन्यप्यथ सा स्त्रियाम् ॥ १३३४ ॥

मधुका श्यामकङ्गौ स्यान्मधुपर्ण्यां च भाषिता ।
रभसेन बहुज्ञेन मधुरस्तु पुमान् रसे ॥ १३३५ ॥

स्वादुसंज्ञे तद्वति तु त्रिषु स्याच्छोभने प्रिये ।
स्त्रियां तु मधुरासंज्ञपुर्यामित्याह यादवः ॥ १३३६ ॥

दूर्वायां मधुयष्ट्यां च मिश्रेयाशतपुष्पयोः ।
मधुकुक्कुटिकासंज्ञमातुलुङ्गान्तरे तथा ॥ १३३७ ॥

मेदायां चेति रभसः क्लीबं तु मरुकेऽभ्यधात् ।
अना तु काञ्जिकेऽथ स्यात् त्रयोदश्यां तिथौ स्त्रियाम् ॥ १३३८ ॥

महोग्रा मेचवत् तु स्यान्मध्वग्रेऽथ नृशण्डयोः ।
मलयः शैलभेदे स्याद् देशेऽप्यवयवे गिरेः ॥ १३३९ ॥

आरामे चाप्यर्थ ज्ञेयं मञ्जुलं त्रिषु सुन्दरे ।
द्वयोस्तु पक्षिभेदे स्याज्जलरङ्काह्वयेऽप्यथ ॥ १३४० ॥

‡जलाञ्जले निकुञ्जे च नपुंसकमुपादिशत् ।
मध्यमस्तु नृशण्डः स्याच्छरीरावयवान्तरे ॥ १३४१ ॥

अवलग्नाह्वये ना तु मध्यदेशेश्वरे नृपे ।
रसानां च स्वराणां स्यात् षड्जादीनां क्वचित् स्वरे ॥ १३४२ ॥

त्रि तु मध्यभवे स्त्री तु मध्यमा मध्यमाङ्गुलौ ।
स्त्रियां च दृष्टरजसि रभसस्त्वाह शब्दवित् ॥ १३४३ ॥

---

१ 'थो' ग. पाठः

---

‡ 'मञ्जुलं च जलाञ्चले' इति तु हेमचन्द्रः, 'जलाञ्चलं स्वतो वारिनिर्गमे शैवलेऽपि च' इति मेदिनी ।

DR.RUPNATHJI( DR. RUPAK NATH )

अस्त्री शिरसि विद्वांसः पुनरन्ये प्रचक्षते ।
शिरसः पूर्वभागस्य मध्य इत्यथ विद्विषि ॥ १३६७ ॥

[1]**मलीको** ना नपि त्वेतदञ्जने सम्प्रचक्षते ।
[2]**मलूको** द्वे पक्षिमात्रे सरोजशकुनौ पुनः ॥ १३६८ ॥

शाकटायन [3]आहैनं **मण्डूकस्तु** द्वयोरयम् ।
[4]भेकेऽपि [5]पिकभेदे च मण्डूकी तु स्त्रियामियम् ॥ १३६९ ॥

गजस्थापरपादस्य कृतस्य दशधा तथा ।
उपरिष्टात् समारभ्य तुर्यभागे तथैव च ॥ १३७० ॥

मण्डूकपर्ण्यामप्याह रभसः शब्दवित्तमः ।
लाङ्गलावयवस्यापि भेदेऽथो राजरक्षिभिः ॥ १३७१ ॥

कृते पुरस्य दुर्गस्य बहिर्भूमौ नृलिङ्गकः ।
यन्त्रभेदे **मयूखस्तु** नृस्त्रियोः किरणेऽथ ना ॥ १३७२ ॥

ज्वालादीप्त्यो रथस्याक्षे शङ्कौ चाथ द्वयोरयम् ।
**मयूरो** बर्हिणे ना तु स्यादपामार्गसंज्ञके ॥ १३७३ ॥

स्तम्बे च तुलसीभेदे चाल्पपत्रसुगन्धिके ।
तं मयूरशिखासंज्ञभेषजे रभसोऽपठीत् ॥ १३७४ ॥

**स्त्री** तु तुत्थाञ्जनेऽथो ना धान्ये मङ्गल्यसंज्ञके ।
केषाञ्चित् स्यान्मसूरोऽयं तथा चर्मासनान्तरे ॥ १३७५ ॥

व्रीहिकङ्कालधान्ये तु **मसूरी** स्त्री तथा भवेत् ।
मारिसंज्ञे रोगभेदे वेश्यायां रभसोऽपठीत् ॥ १३७६ ॥

अथ ना **मसुरो** धान्यभेदे चर्मासनेऽपि च ।
रभसस्त्वाह वेश्यायां स्त्रियां व्रीह्यन्तरेऽपि च ॥ १३७७ ॥

अथो नपुंसकं विद्यान्**मधूलं** शब्दकोविदः ।
[6]सारघादिमधौ ना तु मधूके गिरिसम्भवे ॥ १३७८ ॥

---

१. 'लि' च. पाठः. २. 'लि' ग. पाठः. ३. 'ह स्म म' ग. पाठः. ४. 'च पीतभेके च' ग. पाठः. ५. 'के' क. च. पाठः. ६. 'स्य' ग. ङ. पाठः. ७. 'स' ग. पाठः.

DR.RUPNATHJI( DR.RUPAK NATH )

रसे च मधुराभिख्ये भेद्यलिङ्गं तु तद्वति ।
**मठर**स्त्वृषिभेदे ना भेद्यवत् त्वलसे पुनः* ॥ १३७९ ॥

मठरं तु द्रवीभूते दध्न्यतीव नपुंसकम् ।
त्रि तु कण्ठगतप्राणे कृमिजात्यन्तरे द्वयोः ॥ १३८० ॥

ना[1] त्वग्नौ **मरे[2]तो** जन्तौ द्वे **मन्दाक्षं** पुनर्नपि ।
लज्जायां मन्ददृष्टौ तु त्रिषु मन्देन्द्रियेऽपि च ॥ १३८१ ॥

**मत्स्याक्षी** तु स्त्रियां ब्राह्मीसंज्ञानूपतृणान्तरे ।
मत्स्याक्षस्तु पुमाञ्छाकस्तम्बे पत्तू[3]रसंज्ञके ॥ १३८२ ॥

पुंस्त्रियोस्तु **मरीचिः** स्याद् गभस्तिमृगतृष्णयोः ।
अष्टके त्रसरेणूनां लिक्षाख्यपरिमाणके ॥ १३८३ ॥

सप्तानामृषिभेदानामयमन्यतमे पुमान् ।
**मधुवाक्** तु द्वयोर्ज्ञेयः कोकिले भेद्यवत् पुनः ॥ १३८४ ॥

मधुरा यस्य वाक् तत्र **मत्स्यराट्** तु द्वयोरयम् ।
मकराख्ये जलचरे मत्स्यानां[4] त्वधिपे पुमान् ॥ १३८५ ॥

**मण्डली** तु द्वयोः सर्पजातिभेदेषु केषुचित् ।
षड्विंशतौ मण्डलवदर्थे तु त्रिष्वथ स्त्रियाम् ॥ १३८६ ॥

आवलौ **मालिका**प्याढ्यजनानां मन्दिरान्तरे ।
सप्तलासंज्ञके पुष्पवल्लिभेदेऽप्यसौ स्मृता ॥ १३८७ ॥

भूयोऽपि रभसेनोक्ता चतुर्ष्वर्थेषु मालिका ।
ग्रैवेयके पुष्पमाल्ये पुत्रिकाहस्तिमल्लयोः ॥ १३८८ ॥

आकारान्ताथ सर्वासु पुष्पवल्लीषु मालकी ।
ईकारान्ताथ न स्त्री स्यान्मालकं खेटकाह्वये ॥ १३८९ ॥

---

१. 'जान्वग्नौ' क. च. पाठः. २. 'रुजो ज' च., 'रतौ ज' ग. पाठः. ३. 'त्त' च. पाठः. ४. 'नामधि' ग. पाठः.

---

* 'तथा' इति स्यात् ।

DR.RUPNATHJI(DR.RUPAK NATH)

क्लीबं तु **मूर्छनं** मोहेऽभिव्याप्तौ च स्त्रियां पुनः ।
मूर्छना गीतिधर्मे स्यात् क्वचित् स्त्रीशण्डयोः पुनः ॥ १४३६ ॥
मूर्छना मूर्छयत्यर्थे पुन्नपुंसकयोः पुनः ।
**मूलको** बुस्तिकासंज्ञशाकस्तम्बे त्रिषु त्वयम् ॥ १४३७ ॥
मूलनक्षत्रसंयुक्तकालजातेऽथ पुंस्ययम् ।
वनस्पतौ स्यान्**मूलेरो** हर्षनन्दी त्वभाषत ॥ १४३८ ॥
शब्दार्थवेदिनामग्र्य आपणीयवनस्पतौ ।
क्ली तु पण्ये **मृणाली** तु बिसे लिङ्गत्रयी भवेत् ॥ १४३९ ॥
शाकटायन आह स्म पद्माङ्कुर इतीदृशम् ।
पद्मकोरक इत्याह हर्षनन्द्यथ सज्जनः ॥ १४४० ॥
दयितेऽपि मृणालं त्रि**र्मृदङ्ग**स्तु पुमानयम् ।
महाकोशातकी स्वल्पफलकोशातकीति च ॥ १४४१ ॥
ख्यातयोर्लतयोर्वाद्यभेदे च मुरजाह्वये ।
प्रसवे तूक्तलतयोः क्लीबं स्यान्**मृदुलं** पुनः ॥ १४४२ ॥
भेद्यवन्मृदुनि[1] क्ली तु प्रसिद्धे गन्धवस्तुनि ।
अगुर्विति **मृगाक्षी** तु स्त्रीलिङ्गा स्याल्लतान्तरे ॥ १४४३ ॥
इन्द्रवारुणिकासंज्ञे मृगनेत्रेषु तु त्रिषु ।
अथ प्राहु**र्मृदुत्वक्** स्याद् भूर्जाह्वमहीरुहे ॥ १४४४ ॥
मुञ्जे च त्रि तु मृदुलत्वचि **मेचकवाक्** तु ना ।
कृष्णश्यामलयोर्ज्ञेयो गुणमात्रे त्रिषु त्वयम् ॥ १४४५ ॥
कार्ष्ण्ययुक्ते श्यामलत्वयुक्ते चाथ नृशण्डयोः ।
मयूरचन्द्रके चापि स्तनस्यापि च चूचुके ॥ १४४६ ॥
**मेनादस्तु** द्वयोश्छागे स्यान्मार्जारमयूरयोः ।
**मेहघ्नी** तु हरिद्रायां स्त्री त्रिर्मेहस्य हन्तरि ॥ १४४७ ॥

---

1. 'द्वे' ग. पाठः.

DR.RUPNATHJI(DR.RUPAK NATH)

स्त्रियामुपस्थस्याधस्तात्सूत्रे सूच्यां च नप् पुनः ।
स्यूतौ सीवनमेतच्च केषाञ्चिन्मतमीरितम् ॥ १९६९ ॥

अथो परमशोभायां **सुषमा** स्त्री त्रि सुन्दरे ।
**सुषिरं** तु नपिच्छिद्रे वैजयन्त्यां समीरितम् ॥ १९६६ ॥

वाद्यभेदे च वंशादौ सुषियुक्ते तु[2] भेद्यवत् ।
स्याद् विद्रुमलतायां तु सुषिरा स्त्री नटे तु ना ॥ १९६७ ॥

सर्पाण्डे तु **सुनारो** ना शुनीस्तनपयस्यपि ।
विद्याच्छोभननारादौ समासादीनि पूर्ववत् ॥ १९६८ ॥

गरुडे तु **सुपर्णो** ना किरणे च द्वयोः पुनः ।
अश्वे गरुडवे(द्) ज्ञेयः पक्षिजात्यन्तरेऽथ सा ॥ १९६९ ॥

सुपर्णी विनतायां स्त्री **सुवर्ण**स्त्वस्त्रियामयम् ।
हेम्नि हेम्नश्च कर्षे[‡] + + + + + ++ स्त्रियाम् ॥ १९७० ॥

**सुकन्द**स्तु पलण्डौ ना त्रि तु शोभनकन्दके ।
**सुव्रता** सुखसन्दोह्या या गौस्तत्र स्त्रियां त्रि तु ॥ १९७१ ॥

सद्व्रते [†]**सुवहा** तु स्त्री सल्लकीरास्नयोरपि ।
शेफालिकायामपि च तथा गोधापदीति या ॥ १९७२ ॥

ओषधि + + + + + + + + + **सुकेश्य**सौ ।
स्त्रियां स्यादप्सरोभेदे त्रि तु शोभनमूर्धजे ॥ १९७३ ॥

क्ली तु स्यात् **सुकृतं** पुण्ये सत्क्रियायां च तत् त्रि तु ।
कृते सुष्ठु पुमांस्तु स्याद् बुद्धे **सुगत** इत्ययम् ॥ १९७४ ॥

त्रि शोभनगते क्ली तु (सुरूपं शाल्मलीफले) ।
स्त्रियां तु मल्लिकाभेदे सुरूपा वेश्यसंज्ञके ॥ १९७५ ॥

---

१. 'च' ग. पाठः. २. 'त्रि' ग. पाठः.

---

‡ 'स्यात् क्रतुभेदे तु सा' इति पूरणीय भाति । 'सुवर्णा च मखान्तरे' इति विश्वः ।

† 'सुवहा सल्लकीयेलापर्णीगोधापदीषु वीणायाम् ।
रास्नाशेफालिकयोः स्त्री सुखवाह्येऽन्यलिङ्गः स्यात् ॥' इति मेदिनी ।

